National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(23): 76-79
© 2019 NJHSR
www.sanskritarticle.com

**मनोज कुमार दासः**
शोधछात्रः,राष्ट्रियसंस्कृतविद्या-पीठम्, तिरुपतिः,आं.प्र.

**Correspondence:**
**मनोज कुमार दासः**
शोधछात्रः,राष्ट्रियसंस्कृतविद्या-पीठम्, तिरुपतिः,आं.प्र.

# दाने देयद्रव्याणां विचारः

**मनोज कुमार दासः**

**सारांशः**

दानमेकं कलौ युगे इति[1] मनुवचनानुसारेण दानस्य महत्त्वं सर्वोपरि वर्तते। सत्ययुगे सत्पात्रविशिष्टब्राह्मणस्य गृहं गत्वा मधुपर्कविधिना तं पूजयित्वा दानं दीयते स्म । त्रेतायुगे सत्पात्रयुक्तं ब्राह्मणं स्व गृहं प्रति आहूय दानविशेषो दीयते स्म । कलौ वारम्बारं अनुसृतेभ्यः ब्राह्मणेभ्यो दानं दीयते। यथा

**तपो धर्मः कृतयुगे ज्ञानं त्रेतायुगे स्मृतम् ।**
**द्वापरे चाध्वराः प्रोक्ताः कालौ दानं दया दमः॥**[2]

दानशब्दस्य निर्वचनविषये याज्ञवल्क्यस्मृतौ मिताक्षारेण वर्णितं यत् - **स्वस्वत्वनिवृत्तिः परस्वत्वोपादनं च दानम्** इति । स्वाधिकारपरित्यागः परन्तु केवलं स्वाधकारपरित्यागवसात् यत् किञ्चित् दानं सम्पूर्णं भवितुं नार्हति। स्वामित्वभावनात्यागेनेव दानं सम्पून्नमीति वत्तुं शक्यते । एतदर्थं न केवलं स्वत्वनिवृत्तिः अपितु परसत्वोत्पतिः जायमाना स्यात् । दानस्य षड् अङ्गानि भवन्ति । ते यथा १) दाता , २) प्रतिग्रहीता , ३) श्रद्धा , ४) देयद्रव्यम् , ५) उचितकालः , ६) उचितस्थानमित्यादयः । एतेषु अङ्गेषु एकस्याऽपि अभावे दानानुष्ठानं भवितुं नार्हति । तथा सति दाने देयद्रव्याणां अपेक्षा अत्यन्तं प्रधानं भवति । एवं सर्वेषामपि दानद्रव्याणां विचारः नियतमेव भवति , येनानुसारेण दाता दानस्य फलं प्राप्नोति ।

**उपोद्घातः-**

सात्विकं , राजसं तथा तामसमिति त्रिभिः प्रकारैः दानस्य वर्गीकरणं कृतं भवति । देशकालपात्रतेति सर्वं ज्ञात्वा कर्त्तव्यभावनया यत् दानं त्रियते तथा ग्रहीता यदि सानन्दं तद् दानं स्वीकरोति तर्हि एतादृशं दानं सात्विकमुच्यते । राजसं दानं नाम इच्छायाः पूत्तिनिमित्तं त्रियमाणं भवति । अनुचितकाले अपात्रे अश्रद्धया च यत् दानं दीयते तत् तामसं परिकीत्येति । गुप्तदानस्य अपारः महिमा वर्तते । दानद्रव्यविचारप्रसङ्गे दानमयुखकर्त्ता नीलकण्ठभट्टः[3] प्रतिपादयति –

**यथाविधेन द्रव्येण यत्किञ्चित्कुरुते नरः ।**
**तथाविधमवाप्नोति स फलं प्रेत्य चेह च ॥**

अर्थात् यः नरः विधिना दानं करोति , दानानुगुणं फलमपि प्रास्यति इति । किं देयं किं न देयं , दानार्थं उचितानि अनुचितानि च द्रव्याणि , अयाचितानि याचितानि द्रव्याणि , योग्याः अयोग्याः च पदार्थाः इति एते विषयाः विचारणीयाः प्रसङ्गेऽस्मिन् ।

**अयाचितं दानम्: -**

कुशाः , शाकानि , दुग्धं , मत्स्याः , सुगन्धाः , फलानि , दधि , मांसं , शय्या , आसनं , जलं , धान्याश्चेति पदार्थविशेषम् अपृष्ट्वा अपि प्राप्यते चेत् तिरस्कारः न करणीयः भवति । दुराचारीपुरुषः अपि एतानि द्रव्याणि दानं करोति चेत् एतानि वस्तुनि ग्रहीतव्यानि अयाचितानीति[4] इति याज्ञवल्क्येनोत्तम्[5] –

**कुशाः शाकं पयोमत्स्याः गन्धाः पुष्पं दधिक्षितिः।**
**मांसं शय्यासमं धानाः प्रत्याख्येयं न वारि च ॥**

मनुनाऽपि[6] इदमेवाभिप्रेतं यथा

**शय्यां गृहान्कुशान्गन्धानपः पुष्पं मणीन्दधि ।**
**धाना मत्स्यान्पयो मांसं शाकं चैव न निर्णुदेत ॥**

**दानार्थमयोग्याः पदार्थाः –**

यत्र अस्माकम् अधिकारः अथवा स्वत्वं न भवति ते पदार्थाःदानार्थ- मयोग्याः भवन्ति । जैमीनिः[7] "विश्वजित्" यागस्य कथनावसरे दानार्थम् अयोग्यान् पदार्थान् उल्लिखति। नारदस्य वचनानुसारेण दानार्थं अष्टौ प्रकाराः वर्जिताः भवन्ति। ते यथा–

**१- यः ऋणं गृहितवान् सः ऋणं प्रत्यर्पयितुं कस्मिश्चित् अन्यस्मै धनं ददाति तत् धनं दानाय अयोग्यं भवति ।**
**२- कस्मिश्चित् विशिष्टे अवसरे ऋणरुपेण आगतं कस्याऽपि वस्तु ।**
**३- न्यासार्थं दत्तं वस्तु ।**
**४- संयुत्तासम्पत्तिः ( अनेकस्वामीनां अधिकारवस्तु ) ।**
**५- निक्षेपः ( कस्यापि निक्षिप्तं धनम् ) ।**
**६- पुत्रः तथा पत्नी**
**७- सन्तानानां उपस्थितौ अस्माकं सर्वस्वसम्पत्तिः ।**
**८- कस्मैश्चित् पूर्वमेव प्रदत्तं वस्तु ।**

याज्ञवल्क्येन[8] तस्य व्यवहाराध्याये दानस्योपरि महति व्यावहारीकि दृष्टिः प्रस्तुता अस्ति । यथा –

**स्वं कुटुम्बाविरोधेन देयं दारसुतादृते ।**
**नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम् ॥**

अर्थात् एतद् एव देयं भवति येन परिवारस्य पालनार्थं पोषणार्थं च कष्टं न भवेत् । पुत्रः तथा पत्नी च दानाय प्रदातुं न शक्यते । पुत्रपौत्रादयः सन्ति चेत् सर्वस्वं दानम् असम्भवं भवति । स्मृतिकारः दक्षः[9] प्रतिपादयति यत् मित्राधीनं धनं दानाय योग्यं नास्ति। तेन एवमपि उच्यते यत् भयेन दानाय प्रवृतिः उचिता नास्ति इति।[10] बौधायनधर्मसूत्रे प्रतिपादितं यत् अस्माकम् आश्रीतानां, सेवकानां तथा अनुचराणां , दासानां च कृते भोजनादि व्यवस्थाम् अकृत्वा अतिथिनां तथा अन्यव्यत्तिनां सत्कारः उचितः नास्ति इति।

स्मृतिकारः मनुः[11] कथयति यत् स्वजनं कमपि दुःखितं जनं परित्यज्य कस्याऽपि परजनस्य कृते दानं धर्मविरुद्धमस्ति इति । यथोत्तम् -

**शत्तः परजने दाता स्वजने दुःख जीविनि ।**
**मध्वापातो विषास्वादः स धर्मप्रतिरूपकः ॥**
**भृत्यानामुपरोधेन यत्करोत्यौर्ध्वदेहिकम् ।**
**तद्भवत्यसुखोदकं जीवतश्च मृत्स्य च ॥**

**अस्वीकारयोग्यदानम् –**

मनुः ब्रवीति यत् वेदविदः पण्डिताः अपि दानस्य प्रतिग्रहाय नाम स्वीकरणाय सर्वदा समर्थाः सन्ति । अविद्वान् ब्राह्मणः दाने एतानि वस्तूनि ग्रहितुं न शक्नोति यथा सुवर्णं , भूमिः , अश्वः, गौः , भोजनं , वस्त्रं , तिलं , धृतश्च यदि अपण्डितः ब्राह्मणः लोभवशात् स्वीकरोति तर्हि सः विनश्यति यथा वृक्षः अग्निस्पर्शेण भस्मीभूतो भवति । यथा मनुः[12] यथोत्तम् -

**हिरण्यं भूमिमश्वं गामन्नं वासस्तिलानधृतम् ।**
**प्रतिगृह्णन्नविद्वांस्तु भस्मी भवति दारुवत् ॥**

हेमाद्रिणा[13] ब्रह्मपुराणे दानखण्डे दाननिषिधाः पदार्थाः निरुपिताः यथा मेषः , अश्वः , गजः , तिलं , लोहाः , मृतव्यत्तेः शय्या , आभूषणं तथा वस्त्रञ्चेति ।

**नानादेयद्रव्यदानानि –**

दानार्थं कीदृशी वस्तूसनि देयानि भवन्ति इति आङ्काक्षायां ग्राहकस्य न केवलं पात्रता अपि च पात्रानुगुणं किं दानं करणीयम् इति विषये धर्मशास्त्रकाराः बहुधा निरुपितवन्तः । अपि च दानार्थे प्रयुत्तस्य द्रव्यस्य कीदृशं फलमिति विषये अपि महती चर्चा द्रष्टुं शक्यते । विष्णुधर्मोत्तरपुराणे[14] निर्दिशति यत् -

**यस्योपयोगि यद्द्रव्यं देयं तस्यैव तद् भवेत् ।**
**येन येन च भाण्डेन यस्य वृत्तिरुदाहृता ॥**
**तत्तत्तस्यैव दातव्यं पुण्यकामेन धीमता ॥**

धर्मशास्त्रग्रन्थेषु चतुर्णां वर्णानां कृते तदनुगुणं द्रव्यं वस्तु प्रदेयम् इति निरुपितं भवति । यथा ब्रह्मचारिणां कृते कृष्णाजिनं , दण्डः , कमण्डलुश्च , गृहस्थानां कृते वस्त्रम् , शय्या , आसनम् , धान्यम् , गृहोपयोगि-उपकरणानि , तथा वानप्रस्थानां कृते निवारं , वल्कलं, शाकं , फलमूलानि , गोरसप्रभृतीनि , सन्यासीनां कृते भिक्षादिकं च प्रदेयम् इति विस्तारेण निरुपितम् अस्ति ।

अत्रिसंहितायाम्[15] अत्रिः प्रतिपादयति यत् दुर्भिक्षे अन्नम् , सुभिक्षे सुवर्णम् , वने च जलं प्रदातव्यम् । यतः एवं प्रदानेन मोक्षः सिध्यति इति । यथोत्तम् -

**दुर्भिक्षे अन्नदाता च सुभिक्षे च हिरण्यदः ।**
**पानीयदस्त्वरण्ये च ब्रह्मलोके महीयते ॥**

श्रद्धया समन्वितदानस्य श्रेष्ठतां कल्पयन्ति धर्मकाराः। तत्र आचार्यः देवलः[16] देय-अदेयस्वरुपं निरुपणावसरे निरुपयति यत् अन्याय्येण अर्जिता अखिला अपि भूमिः यदि कुपात्राय दीयते चेत् तत्र दाता प्रयोजनं किमपि न प्राप्नोति । परन्तु श्रद्धया यदि दाता मुष्ठिमात्रमापि शाकं सुपात्राय ददाति तर्हि तत्र दानं सकलविधं मङ्गलं आवहति इति । यथा

**अन्यायाधिगतां दत्त्वा सकलां पृथिवीमपि ।**
**श्रद्धावर्जमपात्राय न काञ्चिद् भूतिमाप्नुयात् ॥**
**प्रदाय शाकमुष्टिं वा श्रद्धाभत्तिसमुद्यताम् ।**
**महते पात्रभूताय सर्वाभ्युदयमाप्नुयात् ॥**

धर्मशास्त्रकाराः बहुधा दानवस्तूनां विषये सविस्तरं प्रतिपादयन्ति। तत्र मनु[17] कथयति

**"सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते ।"**[18]

कथनस्य अभिप्रायः अस्ति यत् ब्रह्मदान श्रेष्ठतमं भवतीति। ब्रह्मदानं नाम "विद्यादानमित्यर्थः । सामान्यदानानि भवन्ति यथा जलं , अन्नं , तिलाः , दीपः , भूमिः , हिरण्यं , गृहं , रजतं , वस्त्रम्, अश्वः , वृषभ; , गौः , यानम् , शय्या , धान्यम् , अभयश्च । एतेषां सामान्यदानानां अपेक्षया विद्याप्रदानस्य फलसिद्धिः अधिका इति कारणेन विद्यादानस्य श्रेष्ठत्वम्।.

**अत्रिस्मृतिः –**

अत्रिस्मृतौ महर्षिः अत्रिः सुवर्णस्य, भूमेः धेनोश्च दानं प्रंशसति।[19] अत्रिसंहितायां कौशयस्य कार्पाशस्य पट्टसुत्रम् अथवा यज्ञोपवीतं , नवनितपूर्णं कांस्यपात्रं , उपानत् , पुरितं कन्या , प्राणाः , विद्या इत्यादिनां दानस्य प्रंशसा अस्ति । तत्र विद्यादानं सर्वोत्कृष्टं भवति इति प्रतिपादितमन्ति।

**विष्णुस्मृतिः –**

विष्णुस्मृतौ[21] बहूनि दानार्थं देयानि द्रव्याणि निरुपितानि सन्ति। यथा कृष्णाजिनम् , उभयतोमुखी गौः , अभयः , भूमिः , धेनुः , कपिला गौः , वृषभः , अश्वः , वस्त्रम् , सुवर्णम् , रजतम् , तैजसं द्रव्यं ( घृतं , दुग्धं , दधि , उपानत् ) , औषधम् , लवणम् , धान्यम् , शस्यम् , अन्नम् , तिलाः , अग्न्यादि इन्धनम् , आसनम्, शय्या , छत्रम् , व्यजनम् , चामरम् , वस्तु ( गृहादिकं ) च।

**संवतस्मृतिः –**

अस्मिन् ग्रन्थे[22] न केवलं "अभयः" दानस्य अपितु दानकरणे अन्येषामपि अंशानां माहात्म्यं प्रस्तुतं भवति यथा वस्त्रं , रजतं, सुवर्णं , अन्नं , जलं , घृतं , आभरणानि , फलं , मूलं शाकं , कुसुमं, ताम्बुलं , पादुका , उपानत् , छत्रम् , शय्या , आसनम् , वाहनम्, शिशिर-ऋतौ-काष्ठं , रोगपिडितायै औषधम् , स्नेहाः आहारः, कन्या इति।

अपरस्मिन् स्थले तैलं , आस्तरणं , पादमर्दनं , शालाङ्गनवृषभः, कांश्यपात्रं , सचैला पयस्विनी धेनुः , पक्षवती धेनुः , शस्यवती भूः, सुवर्णं , भूमिः , जलं , पथ्यम् , स्नेहाः , लेपः , आश्रयः , गुडं , ईक्षुरसः , लवणं , व्यञ्जनम् , सुरभितं पेयं , विद्या , दीपं , तिलाः इति एतेषामपि विषयाणां दानकरणे सौष्ठवं प्रतिपादितामस्ति।

**शतातपस्मृतिः -**

ग्रन्थेऽस्मिन्[23] विविधानां व्याधिनां पापानां च प्रायश्चितकरणाय नैमित्तिकदानानां अन्तर्गतं धेनुः , वृषः , भूः , हिरण्यं , तुरगः, महिषिः , करी ( गजः ) , कुसुमानी , मिष्ठान्नं , धान्यं , वस्त्रम् इत्यादिनां देयपदार्थानां वर्णनमस्ति।

**लघुहारित् स्मृतिः –**

अत्र सुवर्णं , गौः , भूमिः इति एतेषां प्रदानं विशिष्ठमस्तिमिति प्रतिपादितम्।[24]

**बृहत्परासरस्मृतिः –**

ग्रन्थकारः[25] अत्र अन्नदानं जलदानश्च महत्वपूर्णं इति व्यावहारिक दृष्ट्वा विवेकबुद्धया च प्रतिपादितवान् । अत्र वर्ष-ऋतौ- आश्रयः , वितानान , तृणादि , पादमर्दनं , शित-ऋतौ- इन्धनं , आस्तरणं , उपानत् , पादुका , सोपकरणं मृदागृहम्, इषिका , गृहं वा उत्तमः वृषभः इत्यादिनां विशिष्टता निरुपिता। अत्रैव उभयमुखी गौः , तिलधेन्वाः , सुवर्णधेन्वाः, कृष्णाजिनादिनां तथा दानस्य बिधयः अपि सविस्तरं प्रतिपादिताः भवन्ति।

**वसिष्ठस्मृतिः –**

वसिष्ठः स्वग्रन्थे[26] जलं , अन्नं , गौः , शय्या , आसनं , छत्रं , गृहं, उपानत् , भूमिः , कमण्डलुः इति त्रीणि अतिदानानि सन्तीति प्रतिपादितवान् । यथा गौः - पृथिवी सरस्वती इति। अत्र फलप्रदायिनि गौः , शस्यवती भूमिः एवं सरस्वती इति पदेन विद्या च गृह्यते।

**बृहष्पतिस्मृतिः –**

अस्मिन् ग्रन्थे[27] पृथिवी , अन्नं , वस्त्रं , शङ्खः , आसनं , छत्रं , चामरः , स्थावरपदार्थाः , गजः , इन्धनमिति एतेषां पदार्थानां माहात्म्यं वर्णितमस्ति । ग्रन्थकारः दीपदानस्य प्रोक्षणियदानस्य च विशिष्टतां कल्पयति।

**बृद्धगौतमः –**

बृद्धगौतमेन[28] अत्रापि अन्नदानस्य जलदानस्य च माहात्म्यं सविस्तरं प्रतिपादितम् । एषा स्मृतिः बृहत्परासरस्मृत्याः अपेक्षया अधिकां मानवीयकल्याणभावनां स्थापयति। ग्रन्थकारः अत्र श्रान्तसम्वाहनस्य , पादावसेचनस्य , प्रतिश्रयस्य , शय्यायाः, आसनादिनां , च दानं विशिष्टं मनुते।[29] अत्र अन्याषु स्मृतिषु लिखितानि दातव्यानि वस्तूनि अतिरिच्य धर्मोपदेशने स्वीत्रियमाणानां नाट्य गान्धर्वादियन्त्राणां दानमपि उल्लिखितमस्ति। एषा स्मृतिः अनडुहो दानस्य वैशिष्ट्यां कथयति। अत्र कपिलागोदानस्य पर्यालोचनां सविस्तारं कृतमस्ति।[30]

**कपिलस्मृतिः –**

ग्रन्थकारः कपिलः[31] दानवस्तूनां पर्यालोचनावसरे न केवलं देयद्रव्याणां विवेचनं कुरुते अपि तु अदेयद्रव्याणामपि विवेचनं करोति यथा अन्यायोपाजितं द्रव्यं , सार्वजनिनं द्रव्यं, परपीडाकरद्रव्यं , सन्दिग्धद्रव्यं , परास्वाद्यं द्रव्यश्च न कस्मैचित्यपि देयं भवति । शास्त्रविहितानि द्रव्याणि एव दानार्थमुपयोत्तव्यानीति । यथा भूमिः , धेनुः , वाहनम् , गजः, रथः , वस्त्रम् , वृषभः , शय्या प्रबृतयः।

**यमस्मृतिः –**

यमः कथयति यत् यः अन्यस्य धनमपहृत्य दानाय कल्पयति वस्तुतः , इदं दानार्थं योग्यं न भवति । हेमाद्रिः[32] निगदति यत् संस्काररहितं पदार्थं यः ब्राह्मणाय प्रददाति तद् दानं विफलाय भवति । नाम तस्य उद्देश्यपूर्तिः न स्यात् इत्यर्थः । यथोत्तम्

**परिभुत्तमवज्ञातपर्याप्तमसंस्कृतम् ।**
**यः प्रयच्छति विप्रेभ्यस्तद् भस्मन्यवतिष्ठते ॥**

**दक्षस्मृतिः-**

दक्षेण दाने द्रव्याणां विषये अन्यधर्मशास्त्रकाराणां मतमङ्गीकृत्य नैवमतमुपस्थापितमस्ति।यानि आपत्कालमपि दानार्थं अयोग्यानि इति । यथोत्तं दक्षेण[33] -

**शामान्यं याचितं न्यास आधिर्दाराश्च तद्धनम् ।**
**त्रमायातं च निक्षेपः सर्वस्वं चान्वये सति ॥**
**आपत्स्वपि न देयानि नव वस्तुनि सर्वदा ।**
**यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः ॥**

**याज्ञवल्क्यस्मृतिः –**

महर्षियाज्ञवल्क्येन गौः , कपिला गौः , उभयमुखी गौः , कपिला गौः , उभयमुखी गौः , भूमिः , दीपः , अस्वः , अन्नम् ,

वस्त्रम् , जलम् , तिलाः , घृतम् , आश्रयः , गृहम् , सुवर्णम् , वृषः , धान्यम्, अभयम् , उपानत, छत्रम् , माला , अनुलेपनम् , यानम् , वृक्षः , शय्या , विद्या एतेषां देयद्रव्याणां माहात्म्यं वर्णितम्। यथोत्तम् -

**गौ-भू-तिल-हिरण्यादिपात्रे दातव्यमर्चितम् ।**[34]

एतेषु दानेषु विद्यादानं[35] महद्दानं कथयति । एवमेव धर्मशास्त्रे दानविषये महती आलोचना कृता वर्तते।

**सन्दर्भग्रन्थसूची : -**


१.याज्ञवल्क्यस्मृतिः - डा. गङ्गासागर राय , चौखम्बा संस्कृत प्रतिष्ठान , दिल्ली ११०००७, संस्करण २००७

२.भगवन्तभास्करः - डा. वेणीमाधवशास्त्री मुसलगाँवकर , चौखम्बा संस्कृत प्रतिष्ठान , दिल्ली ११०००७, प्रथम संस्करण १९९९

३.श्री नित्यानन्दपन्तपर्वतीयः - चौखम्बा संस्कृत प्रतिष्ठान , दिल्ली ११०००७, चतुर्थ संस्करण वि. सं. - २०५६

४.बौधायनधर्मसूत्रम् - नरेन्द्र कुमार आचार्यः - विद्यानिधि प्रकाशन , दिल्ली ११००९४ , प्रथम संस्करण १९९९

५.चतुवर्गचिन्तामणि श्री हेमाद्रि विरचितः , चौखम्बा संस्कृत प्रतिष्ठान, वाराणासी -१९८५०

६.धर्मद्रुमः - आचार्य राजेन्द्र प्रसाद पाण्डेय , चौखम्बा विद्याभवन

७.मनुस्मृतिः - पण्डित रमेश्वरभट्ट , चौखम्बा संस्कृत प्रतिष्ठान , दिल्ली ११०००७, संस्करण २०११


**सन्दर्भग्रन्थः -**

1. म.स्मृ. -१/८६ , धर्मद्रुमः पृ. - २६८
2. सं. दी. पृ. १ , म.स्मृ. -१/८६
3. दा.म.पृ.- ६
4. या.स्मृ. १/२१४
5. या.स्मृ. १/२१५
6. म.स्मृ. ४/२५०
7. जैमिनि ६/७/१-७ , धर्मद्रुमः पृ. - २७६
8. या.स्मृ. पृ - ३०३ , श्लो - १७५
9. धर्म.इ.धर्मद्रुम पृ -२७६ , दक्ष ३/१९-२०
10. बौ. धा. २/३/२९
11. धर्म.इ.धर्मद्रुम पृ -२७७ , मनु. स्मृ . ११/९-१०
12. धर्म.इ.धर्मद्रुम-२७६ , मनु. स्मृ . -४/१८८
13. दा. ख. पृ. ५७
14. वि.ध.पु. ३/३१६/१३-१४
15. अत्रि.सं. श्लो. - ३३०
16. दा.का.पृ. - ९
17. म.स्मृ. ४/२२९-२३३
18. म.स्मृ. ४/२२९-२३३
19. अ.स्मृ.पृ – ३५१
20. अत्रि.सं , स्मृ.सं. पृ.- ३८२
21. वि. स्मृ. अ. ७८,८८,९०,९१,९२
22. सं.स्मृ. ४६-६१
23. श .स्मृ. ४६-६९
24. ल.हा.स्मृ. ४/७४
25. बृ.पा.स्मृ. १०/१४-१७
26. स्मृ.सं.पृ - ८६६-८९३
27. वसि. स्मृ. अ. -२९
28. वृ.गौ.स्मृ. ६/१-३४
29. वृ.गौ.स्मृ. ६/५१-५२
30. वृ.गौ.स्मृ. १९६६-१९८६
31. कपि.स्मृ. ४२९-४४१
32. दा.ख. पृ - १८
33. द.स्मृ. ३/१७-१८
34. या.स्मृ. १/२०१
35. या. स्मृ. १/२१२